# श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रवृत्तः चतुर्दिनात्मकः आवासीयः संस्कृतभाषानैपुण्यवर्गः

संस्कृताध्येतृच्छात्राणां कृते शास्त्राध्ययनेन समं संकृतभाषया निरर्गलतया शुद्धतया च सम्भाषणस्य अभ्यासः नितान्तम् आवश्यकः इति अस्मत्कुलपतिपादानामभिप्रायम् अनुसृत्य २०१९ तमस्य वर्षस्य नवेम्बरमासस्य २७ तमात् दिनात् डिसेम्बरमासस्य प्रथमदिनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालये आवासीयः संस्कृतभाषानैपुण्यवर्गः समायोजितः। वर्गममुं सञ्चालयितुं कच्छजनपदात् श्रीधर्मेन्द्र मेमकिया महोदयः, जामनगरात कुमारी कोमल भट्ट महोदया, भावनगरात् श्रीप्रणव राज्यगुरु महोदयः, गांधिनगरतः श्रीजय पाढ महोदयः, अहमदाबादतः श्रीचिराग महेता महोदयः, वडोदरानगराच्च डॉ. योगेश त्रिवेदी महोदयः तज्ज्ञत्वेन आहूताः आसन्। एभिः समं अस्मद्विश्वविद्यालयस्य प्राध्यापकाः डॉ. पङ्कज रावल महोदयः, डॉ. दीपेश विनोद कतिरा, श्रीमेहुल जोषी महोदयः, श्रीजिगर भट्ट महोदयः च वर्गसञ्चालने सहकृतवन्तौ।







विश्वविद्यालयस्य वरीयांसः छात्राः श्रीरवि रादडिया, कुमारी मिरल व्यास, कुमारी कीर्ति शर्मा, श्रीनील दवे, कुमारी पूनम भजगोतर, श्रीहर्षित त्रिवेदी चापि वर्गसंचालने सहकृतवन्तः। वर्गस्यास्य उद्घाटने संस्कृतभारत्याः पश्चिमक्षेत्रसंघटनमन्त्री श्रीहिमाञ्जय पालिवाल महोदयः, विश्वविद्यालयस्य कुलपतयः कुलसचिवाश्च समुपस्थाय वर्गस्य सफलनिर्वहणाय आशीर्वचांसि प्राददुः। संस्कृतं काचित् भाषा। भाषायाः अधिगमः अध्यापनेन समं तत्तद्भाषायाः वातावरणनिर्मित्या भवति इति तत्त्वमनुसृत्य प्रत्यहं प्रातः ६वादनात् रात्रौ १०वादनं यावत् विविधाः कालांशाः आयोजिताः आसन्।

अस्मिन् कालावधौ कदाचित् प्रत्यक्षपाठनेन कदाचित् गणकार्यद्वारा कदाचिच्च क्रीडा-प्रतिभाप्रदर्शनादिभिश्च छात्राः संस्कृतेन व्यवहर्तुं प्रेरिताः। वर्गस्य समापने विश्वविद्यालयसंलग्नमहाविद्यालयस्य प्राचार्याः प्रि. नरेन्द्रकुमार पण्ड्या महाभागाः समुपस्थाय छात्रान् उदबोधयन्। वर्गेऽस्मिन् विश्वविद्यालस्य ११६ छात्राः सहभागम् समूह्य नित्यजीवने संस्कृतेन व्यवहारं कर्तुं प्रेरणां प्राप्नुवन्।